## तन्त्रादचिरापहृते । (७०/१८७०)

तन्त्रशब्दान् निर्देशादेव पञ्चमीसमर्थात् अचिरापहृते इत्येतस्मिन्नर्थे कन् प्रत्ययो भवति । अचिरापहृतः स्तोककालापहृतः इत्यर्थः । [1]तन्त्रादचिरापहृतः तन्त्रकः पटः । तन्त्रकः प्रावारः । प्रत्यग्रो [2]नव उच्यते ॥

## ब्राह्मणकोष्णिके सञ्ज्ञायाम् । (७१/१८७१)

ब्राह्मणक उष्णिक इत्येतौ शब्दौ निपात्येते कन् प्रत्ययान्तौ सञ्ज्ञायाम् विषये । ब्राह्मणको देशः । [3]उष्णिका यवागूः । यत्रायुधजीविनो ब्राह्मणाः सन्ति [4]तत्र ब्राह्मणकः इति [5]सञ्ज्ञा । अल्पान्ना यवागूः उष्णिका [6]इत्युच्यते ॥

## शीतोष्णाभ्यां कारिणि । (७२/१८७२)

शीतोष्णशब्दाभ्यां कारिण्यभिधेये कन् प्रत्ययो भवति । क्रियाविशेषणाद् द्वितीयासमर्थादयं प्रत्ययः । [7]शीतं करोति शीतकः[8] । अलसो, जड [9]उच्यते । उष्णं करोति उष्णकः । [10]शीघ्रकारी, दक्ष उच्यते[11] ॥

## अधिकम् । (७३/१८७३)

अधिकम् इति निपात्यते । [12]अध्यारूढस्य उत्तरपदलोपः कन् च प्रत्ययः (म.भा.२.३८७) । अधिको द्रोणः खार्याम् । अधिका खारी द्रोणेन । कर्तरि कर्मणि च अध्यारूढशब्दः ॥

## अनुकाभिकाभीकः कमिता । (७४/१८७४)

अनुक अभिक [13]अभीक इत्येते शब्दाः कन्प्रत्ययान्ता निपात्यन्ते कमिता [14]इत्येतस्मिन्नर्थे । अभेः पक्षे दीर्घत्वं [15]च निपात्यते । अनुकामयते अनुकः । [16]अभिकः । अभीकः ॥

## पार्श्वेनान्विच्छति । (७५/१८७५)

पार्श्वशब्दात् तृतीयासमर्थाद् अन्विच्छति इत्यस्मिन्नर्थे कन् प्रत्ययो भवति । अनृजुरुपायः [17]पार्श्वम्, तेनार्थानन्विच्छति पार्श्वकः । [18]मायावी, कौसृतिकः, [19]जालिकः उच्यते ॥

## अयःशूलदण्डाजिनाभ्यां ठक्ठञौ । (७६/१८७६)

अन्विच्छति इत्येव । अयःशूलदण्डाजिनाभ्यां [20]तृतीयासमर्थाभ्याम् अन्विच्छति इत्येतस्मिन्नर्थे[21] ठक्–ठञौ [22]प्रत्ययौ भवतः । तीक्ष्णः उपायः [23]अयःशूलम् उच्यते । तेन अन्विच्छति [24]आयःशूलिकः (म. भा. २. ३८८) साहसिकः इत्यर्थः । दम्भो दण्डाजिनम्, तेनान्विच्छति [25]दाण्डाजिनिकः । दाम्भिकः इत्यर्थः ॥

---

1. तन्तुवायार्था शलाका तन्त्रम्, तस्मात् इत्यधिकम् क. 2. नवकः ड, अतिनवकः क. 3. उष्णिया क, अग्नेरचिरोपहृता उष्णिका ह. 4. तस्य ड. ह. 5. इयम् इत्यधिकम् क. 6. इति नास्ति क. फ. 7. शीतं मन्दकरणम् ग. 8. मन्दः इत्यधिकम् ग. 9. इत्यर्थः क. ड. ह. 10. तीव्रतादक्षः ह, पटुः ग. 11. इत्यर्थः इत्यधिकम् क. ड. ह. 12. अध्यारूढशब्दस्य ब. 13. अभीकः नास्ति फ. 14. इत्यर्थे क. 15. वा फ, च नास्ति ड. 16. अभिकामयते इत्यधिकम् क. 17. पार्श्वः ग. फ. 18. मायावी नास्ति ब. क. ड. इ. 19. जाल्मिकः ग. 20. शब्दाभ्याम् इत्यधिकम् फ, अयःशूलदण्डाजिनशब्दात् क. 21. यथासङ्ख्यम् इत्यधिकम् ब. क. ड. 22. प्रत्ययौ नास्ति क. 23. अयःशूलः फ. 24. अयःशूलिकः राभसिकः ह. 25. दाण्डाजिनकः क.फ.